# भाषावृत्तिपञ्जिकाकृत् विश्वरूपोपाध्याय:

- डा.प्रियव्रतमिश्र:

**शोधपत्रसारांशः** - प्रस्तुत: शोधलेख: विश्वरूपोपाध्यायस्य विषयेऽस्ति य: खलु मिथिलायां प्रसिद्धवैयाकरणत्वेन प्रथते स्म पुरा । अष्टाध्याय्या: वृत्तिग्रन्थ: पुरुषोत्तमदेवविरचित: “भाषावृत्ति:” इति प्रख्यात एव। तस्य वृत्तिग्रन्थस्य व्याख्यात्वेन “भाषावृत्तिपञ्जिका” विरचिता विश्वरूपोपाध्यायेन। प्राचीनग्रन्थेषु यद्यपि अस्य विषये उल्लेख: समुपलभ्यते, परमर्वाचीनानां कृते अपरिचितोऽयं ग्रन्थ: ग्रन्थकारश्च। अत: तयो: परिचितिरेव अस्य प्रबन्धस्य लक्ष्यम्।

**कूटशब्दाः -** पुरुषोत्तमदेव:, मिथिला, मिथिलासंस्कृतशोधसंस्थानम्, एशियाटिक् सोसायटि, कोलकता, कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालय:।

---

**वाङ्मुखम् -**

अतिरोहितमिदं तलावगाहिनां विदुषां यत् पाणिनीयं हि व्याकरणं शिरोरत्नायमानं विराराष्टितमाम् अखिलेऽपि भुवनतले।तदीयं खल्वष्टकं (अष्टाध्यायी) विद्यमानेषु भाषाविज्ञानेषु उत्कृष्टतममित्यत्र नासत्यवादविभीषिका। अस्या: अष्टाध्याय्या: उपर्यनेका: वृत्तय: विरचिता:। विमलमतिना भागवृत्तिर्विलिखिता। मैत्रेय-रक्षित-शरणदेव-पुरुषोत्तमदेवादयोऽपि विषयेऽस्मिन् स्वमतिं व्यापारयन्।तासु कृतिषु पुरुषोत्तमदेवविरचिता भाषावृत्ति: प्रसिद्ध्यतितमां स्वप्रणयनशैल्या। भाषावृत्ति: नाम लौकिकसंस्कृतशब्दसाधिका वृत्ति:।

**भाषावृत्तिकार: पुरुषोत्तमदेव: -**

बङ्गालाभिजनोऽयं राज्ञ: लक्ष्मणसेनस्य आश्रये न्यवसीत्।बौद्धमतावलम्बीति ग्रन्थारम्भे एव प्रत्यजानत् – “ओम् नमो बुद्धाय” इति। मध्येभाषावृत्तमुदाहरणेषु बौद्धचिन्तनं बुद्धं प्रत्यादरभावश्च दृश्यते १।राज्ञ: लक्ष्मणसेनस्य समय: ११०९ई त: १२००ई.पर्यन्तमत: पुरुषोत्तमदेवस्यापि स एव काल इति मन्यते।पुरुषोत्तमदेवस्य कालविषये निम्नोल्लिखिता: अंशा: ध्येया:।

1. दुर्घटवृत्तिकार: शरणदेव: स्वकालं १२३०ई. इत्युल्लिलेख य: पुरुषोत्तमदेवस्य चर्चामकार्षीत्।

2. अमरकोषस्य टीकाकार: सर्वानन्द: १२१६ई. संव्वत्सरे टीकासर्वस्वमरचीत् यत्र भाषावृत्तेरुल्लेखो दृश्यते।
3. विश्वरूपोपाध्यायकृता “पञ्जिका” भाषावृत्ते: व्याख्यानं १२५०ई.संव्वत्सरे विलिखितम्। सहायकाचार्य:, व्याकरणविभागे, श्रीरामसुन्दरसंस्कृतविश्वविद्याप्रतिष्ठानम्, रमौली, दरभंगा।
4. बौद्धो जिन: पातु व:” ३,३,१७३। न दोषप्रति बौद्धदर्शने -२,१,९।महाबोधिं गन्तास्म:-३,३,१३७। प्रणम्य शास्त्रे सुगताय तायिने १,४,३२।
5. भाषावृत्ते: व्याख्याता सृष्टिधराचार्य: वदति यत् पुरुषोत्तमदेव: राज्ञ: लक्ष्मणसेनस्याज्ञामवाप्य भाषावृत्तिं व्यरचयदिति । लक्ष्मणसेनस्य कालस्तु ११०९ई. संव्वत्सरमित्याकल्यते।

उपर्युक्ताधारेण पुरुषोत्तमदेवस्य समय: ११००ई. त: ११५०ई. अभ्यन्तरे निर्धार्य्यते।

**पुरुषोत्तमदेवरचिता: ग्रन्था: -**

(1) भाषावृत्ति: - अष्टाध्याय्या: लघुवृत्ति:
(2) प्राणपणा – महाभाष्यस्य लघुवृत्ति:
(3) कुण्डलीव्याख्यानम् – श्रुतपालकृतकुण्डलीव्याकरणस्य व्याख्या
(4) कारककारिका – कारकविवेचनपरक: श्लोकात्मक:
(5) परिभाषावृत्ति: - व्याकरणपरिभाषाणां व्याख्या
(6) दुर्घटवृत्ति: - सर्वानन्दद्वारा चर्चिता अष्टाध्यायी वृत्ति:
(7) ज्ञापकसमुच्चय: - ज्ञापकानां संग्रह: व्याख्या च
(8) उणादिवृत्ति: - उणादिसूत्राणामुपरि
(9) कारकचक्रम् – कारकाणां समीक्षा
(10) हारावली – कोष:
(11) त्रिकाण्डकोष: - अमरकोषपरिशिष्ट:

अनेन ग्रन्थराशिना पुरुषोत्तमदेवस्य वैयाकरणत्वं प्रौढलेखकत्वञ्चाभिव्यज्यते ।बौद्ध: सन्नपि पाणिनीयव्याकरणमङ्ग्यकार्षीदिति महत्ताऽस्य व्याकरणस्य। पुरुषोत्तमदेवविरचिताया: भाषावृत्तेरुपरि व्याख्याद्वयं कालान्तरे व्यरचि –

१) **भाषावृत्तिपञ्जिका** विश्वरूपोपाध्यायविरचिता अपरा २) सृष्टिधराचार्यविरचिता **भाषावृत्यर्थविवृत्ति:।**

सृष्टिधराचार्यकृता भाषावृत्यर्थविवृत्ति: “तारा प्रेस्” वाराणासीद्वारा प्रकाशिता परं विश्वरूपोपाध्यायरचिता भाषावृत्तिपञ्जिका आधुनिकविदुषां कृतेऽपरिचिता । अस्मिन्पत्रे तस्मिन्नेव विषये चर्च्यते । व्याख्याया: अस्या: विषये प्राचीनग्रन्थेषु प्रमाणरूपमुद्धरणं समुपलभ्यते।

1) क्षीरतरङ्गिण्यां क्षीरस्वामिना उपाध्यायशब्देन विश्वरूपोपाध्यायमतं प्रत्यपीपदत्।
   1) कुर्द,गुर्द, गुद क्रीडायामेव- उपाध्यायास्तु गुदक्रीडायां पायु विहारे एव द्वौ धातू व्याख्यान्।
   2) अदड् अभियोगे – अड्डति। नन्द्रा द्विरुच्यन्ते – अड्डिडिषति, अदोपधत्वे अडिड्डिषति
   3) “दृ”भये। दिवादौ दीर्यति इति पञ्जिका (धा.५४५)
2) भट्टोजिदीक्षितः प्रौढमनोरमायां विश्वरूपस्य सम्मतिं प्रादर्शयत्- “एवं विश्वरूपमुकुन्दादयः” इति।
   “बह्व्यः श्रेयस्यो यस्य तद् बहुश्रेयसी कुलम्, अत्र नंपुसकह्रस्वत्वं न ई बहुव्रीहेर्न” इति ह्रस्वमात्रस्य प्रतिषेधादिति “श्रीपति-पुरुषोत्तम-विश्वरूपादयः” (अजन्तनंपुसके बहुश्रेयसीशब्दः)

   अनेन प्रकारेण प्राचीनवैयाकरणेषु परिचितोऽयं ग्रन्थः,अर्वाचीनानामपरिचितः अतः परिचित्यर्थं प्राकाश्यन्नीयतेऽत्र।

**विश्वरूपोपाध्यायः -**

भाषावृत्तेः व्याख्याता आचार्यविश्वरूपोपाध्यायः “भाषावृत्तिपञ्जिका” नाम्नीं व्याख्यां व्याख्यात्। अस्य पाण्डित्यं व्याकरणविषयकमाश्चर्यकरं विद्यते परं शैली अत्यन्तः सरलः विद्यते। असौ चाचार्यः विनीतः स्पष्टवादी च बभूव ।दर्शनशास्त्रस्याप्यसौ प्रबुद्धः विद्वानासीत् ।प्रसिद्धः धर्मशास्त्रीयाचार्यः म.म. वाचस्पतिमिश्रः अस्य धर्मसम्बन्धिन्यनेकानि वचनानि उद्जहार । विश्वरूपः मैथिलः विद्वानासीत्। अस्यैव वंशजः सर्वतन्त्रस्वतन्त्रः बच्चा (धर्मदत्त)झा अभूत्।अस्य वंशः सदैव विशिष्टविद्वद्भिरलङ्कृतः। अस्य वंशस्य पूर्णं विवरणं मिथिलायाः “पञ्जीप्रबन्ध”२ग्रन्थात् समुपलभ्यते ।पञ्जीकारश्रीहरिचन्दनझामहोदयानुसारममीषां वंशक्रमः इत्थंकारं विद्यते –
गंगौरा इत्याख्ये ग्रामे गङ्गाधरउपाध्यायः उवास। पुत्रपौत्रादिपरम्परेत्थम्—
वीरः-देवधरः-म.म. विश्वरूपः- देवरूपः- मधुकरः- सर्वदत्तः- लक्ष्मीदत्तः- वरदत्तः- सोमदत्तः - डालु-सूरे-सोरे- काशीनाथः - प्रीतिनाथः - पतिनाथः - अभिरामः - रघुनाथः - जीवेश्वरः - म.म. “बबुरैआ” इति प्रसिद्धः रत्नपाणिः - बाबुलालः - म.म. बच्चाझा (धर्मदत्तः) – जगदीशझाः – रतीशझाः – प्रमोदझाः।
विश्वरूपस्य पितामहः गङ्गाधरउपाध्यायः मिथिलेशनान्यदेवसकाशात् गंगौरा ग्राममवाप्नोत् ।विश्वरूपोऽप्यस्मिन् ग्रामेऽवसत् ।ग्रामोऽयं शिक्षाकेन्द्ररूपेण प्रथते स्म ।साम्प्रतं गंगौली नाम्ना प्रसिद्धः ग्रामोऽयम्। अस्मिन्नेव ग्रामे स्मृतिसारस्य रचयिता हरिनाथोपाध्यायः, चन्द्रालोककारः पीयूषवर्षी जयदेवः. तत्त्वचिन्तामणिकारः गङ्गेशोपाध्यायः,आलोकव्याख्याकारः पक्षधरमिश्रः,म.म. शङ्करमिश्रः, म.म.वाचस्पतिमिश्रः,म.म. गोविन्दठक्कुरः,३ म.म. मधुसूदनठक्कुरः, म.म. देवनाथठक्कुरः, इत्यादयः विद्वांसः अध्यापयामासुः।

विश्वरूपस्य वंशज: कालान्तरे अन्यत्र अयासिषु: । सप्तदश: वंशज: “जीवेश्वरझा:” “नवानी” इति ग्रामे अतिष्ठिपत् यत्र साम्प्रतमप्यस्य वंशजा: विद्यन्ते । महामहोपाध्याय: रत्नमणिझा: न्यायसाहित्यव्याकरणधर्मशास्त्राणां निष्णातो बभूव । एतेषां पुत्रोऽपि नैयायिक आसीत् । सम्प्रति बच्चाझामहोदयस्य पुत्र: रतीशझा मिथिलायां प्रसिद्ध: नैयायिक इति मन्यते । अनेन प्रकारेण आचार्यविश्वरूपस्य वंश: विद्यावैभवसम्पन्न आसीत् अस्ति च । विश्वरूप: मैथिलपरम्परानुसारेण पञ्चदेवोपासक: स्मार्त्तब्राह्मणो बभूव ।“ भाषावृत्ति:” यद्यपि बौद्धरचिता तथापि तस्या: व्याख्यानमनेनाकारीत्यत्र छात्रोपयोगित्वं विद्वदुपयोगित्वञ्च कारणम् ।

२.वंशानुक्रमवर्णनं मिथिलायां विशेषरूपेण व्यवस्थापितं तदेवं “पञ्जीप्रबन्ध:” इत्युच्यते ।

३.गंगौलीग्रामे अद्यापि “सातों डीह” नाम्ना एतेषां सप्तानां पुत्राणां निवासस्थानं स्मर्यते ।

विश्वरूपस्य नाम्नी त्रय: ग्रन्था: प्रसिद्धा:-

1) बालक्रीडा४ – याज्ञवल्क्यस्मृते: व्याख्या
2) विश्वरूपनिबन्ध: - कारिकात्मक: धर्मशास्त्रीय: ग्रन्थ: ।
3) भाषावृत्तिपञ्जिका – अष्टाध्यय्या: उपटीका ।

यद्यपि विश्वरूपनिबन्ध: धर्मशास्त्रीयग्रन्थ: याज्ञवल्क्यस्मृत्यवलम्बित: तथापि मिताक्षरायामस्योल्लेखत्वात् अर्वाचीनोऽयं ग्रन्थ: । परवर्त्तिन: मैथिला: निबन्धकारा: सादरमग्रहीषु: ग्रन्थममुम् । चण्डेश्वरठक्कुर-विद्यापतिठक्कुर-वाचस्पतिमिश्रादिभि: चर्चितत्वात् अस्य काल: १३०० ई. इति मन्यते । दौर्भाग्यात् अयं ग्रन्थ: साम्प्रतं नोपलभ्यते । यदि प्राप्येत तर्हि तदाधारेण कालं दृढीकर्त्तुं शक्यते । एवं स्थितौ विश्वरूपनिबन्धस्य भाषावृत्तिपञ्जिकायाश्च समानकाल इत्यनुमीयते । अत: द्वयो: भिन्नरचयितारौ इति कथने नास्त्यौचित्यम् । पी.वी.काणेमहोदयोऽपि विश्वरूपनिबन्धं बालक्रीडाया: परवर्त्तिकालिक: इति मनुते ।

**विश्वरूपनिबन्धस्योद्धरणम् –**

कृत्यहार्णवे म.म.वाचस्पतिमिश्र: विश्वरूपस्य कतिपयानि वचनानि उल्लिलेख ।

५अष्टमीरात्रौ बलिदानं विश्वरूपनिबन्धे—

ततो रात्र्यपरे भागे माहिषम् तत्र दापयेत् ।
पञ्चाब्दं लक्षणोपेतमजमेकं तथैव च ॥
महाष्टम्याश्विने मासि शुक्ला कल्याणकारिणी ।
सप्तम्यापि युता कार्या मूलेन तु विशेषत: ॥
महाष्टम्यां भगवती भद्रायामपि पूजिता ।
ददाति चायुरारोग्यं यतो भद्रास्वरूपिणी ॥
कुलं पुत्रं धनं धान्यं दीर्घमायुस्तथैव च ।
प्रथमा चाष्टमी पूज्या य: काङ्क्षति सदा शुभम् ॥
आश्वयुज्यष्टमी यत्र पूज्या नवममिश्रिता ।

दुर्भिक्षं तत्र जानीयाद् दशवर्षाणि पञ्च च ॥

४.त्रिवेन्द्रं संस्कृत सीरिज् गणपतिशास्त्रिसम्पादितम्।

५. कृत्यमहार्णवे,आश्विनकृत्यप्रकरणे पृ.९४

दैवी निवेश्यते यत्र नवम्यां तु नराधिप।
राहुपीडा भवेत्तत्र कुलप्राणापहारिणी ॥
दशम्यां दीयते यत्र बलिदानञ्च मानवैः।
तद्राष्ट्रं नाशमायाति नरकोपद्रवैः स्फुटम् ॥

**विश्वरूपः-**

दिवानक्तं परित्यज्य यत्र भद्रा न लभ्यते।
तत्र पूजा बुधैः कार्या लंघनीया न कर्हिचित् ॥

विशिष्टत्यागाशक्यत्वे स एवाह –

विष्टिं त्यक्त्वा महाष्टम्यां यः पूजां कुरुते मम।
तस्य पूजां न गृह्णामि तेनाहमपमानिता ॥
जम्भेन सप्तमीयुक्ता पूजिता च महाष्टमी।
इन्द्रेण निहतो जम्भस्तस्माद् दानवपुङ्गवः ॥
तस्मात् सर्वप्रयत्नेन सप्तमीमिश्रिताष्टमी।
वर्जनीया हि मनुजैरात्मनः शुभकाङ्क्षिभिः ॥
सप्तमीशल्यसंयुक्तां मोहादज्ञानतोऽपि वा।
महाष्टमीं प्रकुर्वाणो नरकं प्रतिपद्यते ॥

उपर्युक्तविवरणेन स्पष्टं यद् “विश्वरूप” नाम्ना द्वौ आचार्यौ अभूताम् –

1) विश्वरूपः - याज्ञवल्क्यस्मृतेः व्याख्याकारः ९ई शताब्दी
2) विश्वरूपोपाध्यायः - भाषावृत्तिपञ्जिकायाः, विश्वरूपनिबन्धस्य रचयिता १३ई शताब्दी।

काणेमहोदयः प्रथमविश्वरूपस्य विषये विवृतवान्,परमत्र विवेच्यविषयः विश्वरूपद्वितीयः।

**विश्वरूपोपाध्यायस्य ग्रन्थाः--**

विश्वरूपोपाध्यायस्य द्वौ ग्रन्थौ इति पूर्वमेव प्रतिज्ञातं तद् सम्प्रति विव्रियते –

1) विश्वरूपनिबन्धः - अस्य हस्तलेखः साम्प्रतं न लभते। परं कतिपयान्युदाहरणानि तत्र तत्र समुपलभ्यन्ते। चण्डेश्वरठक्कुरविद्यापतिठक्कुरवाचस्पतिमिश्राश्च समचर्चयन्। एतैः उद्धरणैः ज्ञायते यदयं श्लोकात्मकः ग्रन्थः।
2) भाषावृत्तिपञ्जिका – पुरुषोत्तमदेवकृता भाषावृत्तिः (अष्टाध्यायीव्याख्या),तस्याः एव विवरणं भाषावृत्तिपञ्जिका।

अस्याः चत्वारः हस्तलेखाः समुपलभ्यन्ते-

1) भाषावृत्तिपञ्जिका – तालपत्त्रं- पत्त्रसंख्या- १२९,मिथिलाक्षरम्,मिथिलासंस्कृतशोधसंस्थानम्,दरभंगा
लिपिकाल:- १६४९ई. ग्रन्थसंख्या- ३२१२ पूर्वार्धमात्रम्।
2) भाषावृत्तिपञ्जिका – तालपत्त्रं- संख्या- ११ बङ्गलाक्षरम्-एशियाटिक् सोसायटी कोलकता,ग्रन्थाङ्क:- ४२५० खण्डिता।
3) भाषावृत्तिपञ्जिका—तालपत्त्रजीर्णा, पत्त्रसंख्या-५७ मिथिलाक्षरम्,समय: -१४५० ई. कामेश्वरसिंहसंस्कृतविश्वविद्यालय:,दरभंगा। हस्तलिखितग्रन्थ: सं २०१४ खण्डित:।

**निष्कर्ष:** - साम्प्रतं ग्रन्थोऽयं मिथिलासंस्कृतविद्यापीठेन (दरभंगा) प्रकाशित:। सम्पादकाश्च प्रो. शशिनाथझामहोदया: स्नातकोत्तरव्याकरणविभाग:, कामेश्वरसिंहदरभंगासंस्कृत-विश्वविद्यालय: बहु परिश्रम्य ग्रन्थरत्नममुं लोकलोचनगोचरतामकार्षु: । तदधुना बहुलतया प्रसारणीय: प्रचारणीश्चेत्यलं पल्लवितेन।

**सन्दर्भग्रन्थ:-**

1. “भाषावृत्तिपञ्जिका” सम्पादक:- प्रो.शशिनाथ झा ,मिथिलासंस्कृतविद्यापीठप्रधानेन डा.कृष्णकान्तत्रिवेदिना प्रकाशिता – 2001।